



Track

Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 06/12/2014 | Typing Started on | H K Srinivasa Rao |
| 2 | 06/12/2014 | Typing Ended on | H K Srinivasa Rao |
| 3 | 11/12/2014 | Ist Proof Reading & Correction | H K Srinivasa Rao and M S Venugopal |

**॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥**

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Narayana Pandithacharya. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 8095551774,9901971176, Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ, ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ- ಶ್ರೀಶುತೀಶ ಪ್ರಕಾಶನಮ್, ಧಾರವಾಡ – ಪಾರಿಜಾತಾಪಹರಣಮ್- ಅನುವಾದಕರುಃ ತಾಡಕೋಡ ವಾದಿರಾಜಾಚಾರ್ಯಃ

ಗ್ರಂಥ ಋಣ- ಪಾವಂಜೆ ಗುರುರಾಜಾರಾವ್ ಅಂಡ್ ಸನ್ಸ – ಉಡಪಿ –ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಯೋಗದೀಪಿಕಾ -1956.

TABLEOFCONTENTS

ಕೃತಜ್ಞತೆಗಳು .......... 2

पारिजातापहरणम् .......... 5

**प्रथम आश्वास** -1- (55) .......... 5

**द्वितीय आश्वासः** -2- (53) .......... 11

**तृतीय आश्वास** -3- (71) .......... 17

# पारिजातापहरणम्

## प्रथम आश्वास -1- (55)

वन्दे धामानन्तं दधतं पुरुषोत्तमं त्रिधामानं तम्।
युतवसुधामानन्तं दैत्यानां यो व्याधाद्युधामान् अन्तम् ॥1॥

गौः सहराजातानि प्राणिष्वपियानिबहुधुराजातानि।
येन सुरा जाता निःश्रमा बलारिश्च तेषु राजातानि॥2॥

धृतनिरवेदमयानि ब्रह्मपरं तापमहभवेदमयानि।
इति समवेदमयानि स्थिरो यदङ्गानि संत्रिवेदमयानि॥3॥

यो भूमोदाराणां पतिरिव पातेष्टसत्तमोदाराणाम्।
अपि परमोदारणां जगतां षड्वत्त्यारिणस्तमोदाराणाम्॥4॥

बहुवादमहार्थेभ्यः प्रणतिं कुर्मः त्रिविक्रममहार्येभ्यः।
मध्वपदमहार्येभ्यः श्रेष्ठाये भेजुरशुभशमहार्येभ्यः॥5॥

जयति स राजाऽवन्या जयसिंहो योग्ययाऽस्तराजावन्या।
कान्त्या राजा वन्यानेकपजिद्याऽस्ततो वराजावन्या॥6॥

अथ नानाभोगानां पदे यदुपुरेवसद्धनाभोगानाम्।
लसति धनाभो गानान्नाके द्रष्टेव पद्मनाभोऽगानाम्॥7॥

देवनिकायानाम भ्यर्थनया योजनि स्वकायानाम।
गोःस्थिरकायानाम प्याप्त्यै यस्यारुजोधिकायानाम॥8॥

| |
|---|
| येन हता पापाऽयात् अपि निरयं पूतना वितापापाया।<br>यं जनतापापायाइति यद् द्वेष्ट्रीच सुप्रतापापाया॥9॥ |
| सुचिरं वृन्दावनतः चकासयस्सेन्द्रदेववृन्दावनतः।<br>भुवनानन्दावनतः स्फुरितोत्पलरुग्यतस्सनिन्दा वनतः॥10॥ |
| कालियनामा नागः शमितो येनाकृतं च नामानागः।<br>अपि येनामानागस्थेम्ना गमितश्च दुर्मना मानागः॥11॥ |
| योवल्लवकान्ताभिः मुदिताभीरतिमयादलवकान्ताभिः।<br>तरुपल्लवकान्ताभिर्वनालिभिः शुभशुकामलवकान्ताभिः॥12॥ |
| यस्तरसा मधुरायाः कंसेनाकारितो रसामधुरायाः।<br>निजसहसामधुरायाः पुष्टिं यस्योचितामसामधुरायाः॥13॥ |
| यो वा ना रामेण प्रययौ नगरं च शोभनारमेण ।<br>श्रितनानारामेण पुरितं वपशा लसन्धनारामेण ॥14॥ |
| कंसोऽप्यदयेनबलन् न्यवधि दधानस्तदासमुदयेन बलम्।<br>रक्षन् उदयेन बलं शक्त्युद्रेकेण योजयदयेनबलम्॥15॥ |
| येन जराया मानिप्रवरस्तनयो जितःसुरायाऽमानि।<br>योऽपि धरायामानिः श्रमोऽप्युत यशांसि यान्वरायामानि॥16॥ |
| लोके माननयेनश्रीमान्योच्र्यः सुवक्रमा न न येन।<br>दग्धोमाननये न स्वारिः सुदमोनयस्त्वमाननयेन॥17॥ |

| |
|---|
| रेजेऽसादस्तेन क्षितिलोकोभावितप्रसादस्तेन।<br>असुखरसादःस्तेनक्ष्मेशाः स्वकुलेन सहरसादस्तेन॥ 18॥ |
| अथ भुवनानामायन् नेता शक्रः तमस्तनानामायम्।<br>पृथुलमनानामायं यो व्यतनोत्साधुसज्जनानामायम्॥ 19॥ |
| अध्यासामास ततः पीठप्रवरं मुदा सुधामासततः।<br>वन्दितभूमासततश्रीरास्ते यत्पुरे सुकर्मासततः॥ 20॥ |
| स तु तरसा देवतया प्रोचे वज्री तदा रसादेव तया।<br>बहुमहसा देवतया मान्या प्राक् लङ्घितेऽरिसादे वत(बत)या॥ 21॥ |
| शक्रभवानामयतः स्थितो विना किं समानवानामयतः।<br>वरदेवानामयतः श्रियं तु ते शत्रवोऽथवानामयत॥ 22॥ |
| इत्युक्तेनेनायन् नमनं सोऽस्मृतविपच्च तेने नायम्।<br>यात्यहितेनेनायं स्वर्गं दध्यौ प्रपद्यतेनेनायम्॥ 23॥ |
| समदृक्तामरसेन प्रोचेचैवं प्रपालितामरसेन।<br>खिन्नोऽरम्यसमरसेन ह्यस्पृष्टक्लेशहन्सतामरसेन॥ 24॥ |
| सूचितनरको नामस्पृष्टोदुष्टो बभूव नरकोनामः।<br>गां सोनरकोनामत्यशयिष्टैतज्जयीष्टनरकोनाम॥ 25॥ |
| श्रेष्ठं नाकारिभ्यः प्रभो विना त्वामिमं घनाकारिभ्यः।<br>शिशुललनाकारिभ्यः को हन्ता सदवमाननाकारिभ्यः॥ 26॥ |

हीनः शम्बरतेन स्वतेजसाऽहं स्थितीष्टशम्बरतेन।

अपि साशं बर ते न दृताः सुराः शक्त्यतीतशम्बरतेन॥ 27॥

समरे कीनाशेन त्रस्तं च निकृत्तपातकीनाशेन।

नातङ्कीनाशेनः स्थेम्नो वपुषोप्यकार्मुकीनाशेन॥ 28॥

धनपतितो वारणतः शुचानयातंविशक्तितोऽवारणतः।

लोचनतो वा रणतः पततिस्म कस्येश रोदतोवारणतः॥ 29॥

विहिता गाङ्गेयेन ह्यम्बाभूषा हृताऽसतगाङ्गे येन।

क्षिपता गाङ्गेयेन द्विपवत् विहृतं जले च गाङ्गेयेन॥ 30॥

भवनानानाशानां पातृणां शत्रुणाऽदुनानाशानाम्।

पातानानाशानां पङ्क्त्येषूणांमसज्जनानाशानाम्॥ 31॥

अथ सनमनवासवतः श्रुतवान्दैतेयजव्यसनवासवतः।

क्षान्तिमिहनवास वबत व्यद्घात्-हलिनोऽनुजः प्रियनवासवतः॥ 32॥

न लोकनाथोऽथ यियासुरास नासुरासनाय प्रियया सह प्रभुः।

या रुपकान्त्या जितभासुरासना सुरासनानावचने गते हरौ॥ 33॥

ध्यातो धिया भूरिविलासमायया समाययावत्र पतङ्गनायकः।

तेनानया चारुरुहे समायया स माः यया वक्ररुचा व्यजीयत॥

धृतः सभार्योऽन्वकरोत्तदामुदां विना विनाशैर्गुरुभाविना विना।

विद्युद्युतं गुरूढगिरिं घनं जनानवन्नवन्ध्यं गततानवं नवम्॥ 35॥

| |
|---|
| तलेऽधिकं कोमललोहितेहिते हितेहिते यस्य रते सतां सदा।<br>लसन्नखे दानवता पदे पदे पदे पदे सिञ्जितमञ्जुनूपुरे॥ 36॥ |
| जङ्घा च यस्य क्रमपीवरा वरा वरावरातिं दधतः सदा मुदाम्।<br>ऊरु च यस्याततशोभयाभया भयाभयातापदवी व्यराजत॥ 37॥ |
| श्रोणीमधत्तानवराम्बरां वरान्ददन्निजेभ्योऽधिकपीवरां वराम्।<br>यो वामयाप्तांवररामया मयानयातयाऽनन्यगकामया मया॥ 38॥ |
| यो वा त्रिलोकास्पदसुन्दरोदरो द्विषद्वधूभ्योऽश्रुदरोदरोऽनिशम्।<br>आर्येषु देवो रचितादरो दरोल्लासी प्रचण्डप्रदरोऽदरो बभौ॥ 39॥ |
| श्रीनामकं येन महां महोरसा दध्रे दृशां काममहो महोब्दहम्।<br>पीनोन्नतांसेन विहारिहारिणा मधोः सदा मानसहारि हारिणा॥ 40॥ |
| येनामितौजोगुणमाकराकराऽकरा कराणां च चतुष्टयी दधे।<br>वृत्ता वरा दैत्यवराजिताजिताऽजिताऽजिताश्चारिगदास्त्रनन्दकाः॥ 41॥ |
| वाग्नोपिता यस्य वसुन्धराऽधराक्षिप्ताग्र्यबिम्बस्य महाधराधरा।<br>योऽधाल्लसत्कौस्तुभमङ्गलं गलत्रादास्तदैत्यं गुणभागलं गलम्॥ 42॥ |
| यस्यातिमात्रं लसमानमानयत् क्षयं विधोः कान्त्याभिमानमाननम्।<br>क्वचित्प्रियाणामसमानमाननं सुमन्दहासं कृतमानमाननम्॥ 43॥ |
| यस्यास्यसङ्गी रिपुभैरवैरवैस्वैरवैक्लव्यहृदो दरो लसेत्।<br>यस्यायते शोभनलक्षणेक्षणे क्षणे क्षणेनैव च सिद्धिदे सताम्॥ 44॥ |

| |
|---|
| स मालभारी मृदुकेशकेऽशनैः ययौ ससत्यः प्रियकेशकेशवः।<br>किरीटनानामणिराजिराजितः सकुण्डलो युद्धवराजिराजितः॥ 45॥ |
| प्रीतेन तेन स्म स नीयते रुचा प्राप्तेनतेनर्क्षपथे गरुत्मता।<br>द्रुतेन ते न प्रभवेदमुष्य भीः गतेन तेनन्विति वल्लभां वदन्॥ 46॥ |
| पुरा पुराणोऽमृतभोगिनां समं पुरा पुराग्र्यं पुरुषः प्रपश्यति।<br>नगेन, गेयामलकीर्तिरूल्लसत्नगे न, गेहं द्विषतोऽतिदुर्गमम्॥ 47॥ |
| तं शातकुम्भाङ्गदयाथबाहया भित्वाऽऽप शभां गदया जगद्गुरुः।<br>महासुरे भाङ्गदयास्तपाशकः ध्वस्तारिदम्भां गदयादवाग्रजः॥ 48॥ |
| तदोन्महा दानवराट् समभ्ययात् द्युधामहा दानरतो रुजामिह।<br>संयन्महात् आनमितक्षमो द्रवन् तुष्यन् महादानविभिन्ननागवत्॥ 49॥ |
| स कन्धरायामतनुं निकृत्य तं वसुन्धरायामरिणा न्यपातयत्।<br>पुनर्धरायामतनूंश्च तत्सुतान् सुरेद्धरायामपहारतत्परान्॥ 50॥ |
| श्रीमत्तरं शङ्खवरं कलापतः कलापतः स्वच्छरुचामपूरयत्।<br>समुद्धरिष्यन् प्रदरान् कलापतः कलापतः शत्रुमवध्यमाह्वयत्॥ 51॥ |
| स बाणवर्षोऽथ सकोपमाययावरिःस्वचम्वात्र विलोपमायया।<br>पत्यादिमत्याखिलगोपमायया हृताः सुहेत्या रहितोपमायया॥ |
| दृष्ट्वा जयन्तीमुत लज्जयन्तीमुब्देजयन्तीं तमराजयन्तीम्।<br>स्त्रीं वैजयन्तीं च सभाजयन्तीं स्वां भ्राजयन्तीमनुराजयन्तीम्॥ 53॥ |

दत्वा तस्यै सेनयासेनयातं सूढः ताक्ष्र्यांसेन या सेन यातम्।
कालायस्वर्भानुभानुच्चताकृत्-चक्रेणादाद् भानुभानुप्रभेण॥54॥

उचिता सुमनोभिरथप्रणुतिः रचिता सुमनोभिरजे जयिनि।
श्रुचितासु मनोभिरमुष्य रतैः प्रचितासुमनोभिरिवाङ्घ्रिमितैः॥55॥

**श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्य विरचितायां पारिजातापहरणकाव्यराजं प्रथम आश्वासः समाप्तः॥1॥**

## द्वितीय आश्वासः -2- (53)

अथ धरयामानेनस्वान्तेनापे स नम्रया मानेन।
शोकायामा नेनद्युति यस्मिन् या च सोपयामानेन॥1॥

भवननोऽवनतोऽस्य भुवा श्रियोन्नवनतोऽवनतोषितयाऽऽत्मनः।
भुवनतो वनतोदिवसोः परः पवनतो वनतो नभसोऽप्यसि॥2॥

सकलया कलयासि युतः श्रिया सकलया कलयामिहितेऽञ्जलिम्।
सुकलया कलयादिद रुक् स्मितोऽब्जकलया कलयेत्वजतां समाम्॥3॥

सहितयाहितया दयया दृशा रहितयाहितयास्य सुतं कृधा।
महितयाहितया वर पालयन् महितयाहितया पद्योर्नतम्॥4॥

उचितयाचितयारसयेतिमुद्रचितया चितया पुलकश्रिया।
लसितया सितयास्य रुचा स्फुरद्हासितया सितयास्वपतेः श्रमः॥5॥

| |
|---|
| सरसया रसया रस यादवो वरसयाञ्चगिरार्पितकुण्डले।<br>धनवतो नवतो नवतोद्विषं सुनवतोऽपि पुराद्विविधं वसु॥6॥ |
| घनतया नतया स्तनयोर्वधू जनतया नतयारि हृतानया।<br>रुचिरया चिरयातमुदाहृदोद्रुचिरयाचि स्यात् अहरच्च ताम्॥7॥ |
| परमयारमया न परंमुदोऽचरमया रमयाद्रविणात्मना।<br>स पतता पततामुडुपद्धतिं प्रपतताऽपततान् च वारिदान्॥8॥ |
| कमलया वनितावरया युतो विमलया वनितां विदधत्सताम्।<br>समलयावनिरुद्धुरभिः सदा क्लमलयौ अनितः स्म विराजते॥9॥ |
| अभ्रमानवमयं रुचाऽऽक्षिपत् विभ्रमानवमविद्युदम्बरः।<br>सभ्रमा नववचो व्यधुः तदाऽदभ्रमानवमवेक्ष्य खेचराः॥10॥ |
| देवताररतिकरीं पुरीं रया देव तारपटहस्वनां सताम्।<br>देवतारचयिताऽसुरव्यथादेवतारविभवेस्थितोऽविशत्॥11॥ |
| ऐक्षतावितथकामनो रमानाथ एव वनिता मनोरमाः।<br>शत्रुबन्धपटुवामनोऽरमाऽऽयन्श्रिया गुरुतरो मनोः अमा॥12॥ |
| तत्र दैवतसभासु रङ्गतः स्त्रीजनान् अधिकभाः सुरङ्गतः।<br>सोऽभ्यनन्ददथ भासुरं गतः श्रीगुणं य इह नासुरङ्गतः॥13॥ |
| मानयत्यमुमथ स्म वासवो मानयत्यविकलेऽत्र भक्तिमान्।<br>मानयत्यविषयो मुहुर्निजामानयत्यपि नतिं तनुं पुरा॥14॥ |

| |
|---|
| सारसायतदृशाप्तकुण्डले सारसायनभुजां गुरुर्दधौ।<br>सारसायमवलोक्य नन्दिता सारसायमवदच्च तं तदा॥15॥ |
| अम्बुराशिशयनायकेश ते भक्तभूतिचयनायकेशव।<br>सन्नतिः सुनयनाय केवलं स्याद्भवादुदयनाय केशिहन्॥16॥ |
| सुन्दराय तनयाय मे नमोऽमन्दराः यतनयाय ते बलेः।<br>मन्दराय ततकूर्मवेष सकन्दरायतरसास्थिरत्वद॥17॥ |
| बध्यते परमयत्नतेऽञ्जलिः मूर्ध्नि ते परमयन्तमोनुदन्।<br>स्वेदयाम्परमयन्निितिस्तुतः तां दृशाऽऽपरममन्नयं स्मितम्॥18॥ |
| ईक्षते स्म शुचि नन्दनं दया वारिधिर्नयननन्दनं दधत्।<br>सेवते प्रियसनन्दनं दमी सज्जनोऽयमुतनन्दननन्दनम्॥19॥ |
| तत्र सोऽरमतनाम कान्तया स्वियया स्फुटितहेमकान्तया।<br>यान् मुदं कुसम वाम कान्तयाऽऽवर्जितापरनियामकान्तया॥20॥ |
| केशवस्य रमणिऽयमेष तौ तत् वनं वरमणी यशस्विनौ।<br>पश्यतः स्म  रमणीय पल्लवं स्पर्शनादलमणीयसो वरम्॥21॥ |
| विभ्रतं सुमुखसारसमाः निध्यायाति स्म नवसूरसमानि।<br>पल्लवानि तरुमत्र स मानिस्थानमाप्य विभवैरसमानि॥22॥ |
| व्याप्तपुष्पगणसौरभवन्तं पारिजातमथनीरभवन्तम्।<br>भान् अधः कृतसमीरभवं तनून्यस्तदृक् सुमुद आर भवन्तम्॥23॥ |

| |
|---|
| प्रेक्ष्य तं रुचिरसारसनेऽत्राऽऽसक्तफुल्लनवसारसनेत्रा।<br>सा स्थिता मृदुपदेरसनेत्रास्यान्तरास्थ विधुना रसनेत्रा॥24॥ |
| दानवारिवर नः पुरि सम्पद्दानवारिकरभात्वगलक्ष्मीः।<br>दानवारिमदिभप्रतिमाः सद्मा न वारितबला भवता के॥25॥ |
| प्रीतिमान् अनवमो मयि चेत् त्वं कान्त, माननवता हृदयेन।<br>शोभमाननवपल्लवमेनं देहि माननवनं मम भूयात्॥26॥ |
| पालयान्तमधिकं दयिताया लालयान्तमिति वाचमपीमां।<br>चालयन्तमगमीक्ष्य जवेनोन्मूलयन्तममुमैक्षत लोकः॥27॥ |
| वैरिजातस्य हन्तेन्द्रो वारिजातस्य शुश्रुवान्।<br>पारिजातस्य हर्तास्तिनारिजा तस्य भीरिति॥28॥ |
| नाथायानेन चुकुपेऽव्याथायानेनसे अपि अहो।<br>वृथाऽयानेन सान्त्वेऽस्य कथायाः नेन आस्पदम्॥29॥ |
| चचाल सिंहासनतो ह्यहासनतक्षमः।<br>तरुप्रवह्लासनतः स्वारिहा स न तस्थिवान्॥30॥ |
| वपुः सद्दक्तमालस्य रक्तमालस्यमुघ्नुषा।<br>लावण्य जितमालस्य सक्तमालस्य तद् बभौ॥31॥ |
| आरुरोह महानागमहानाऽऽगामि तेन रुट्।<br>भुजेऽरिधामहा नागमहा नागणयद्दरिम्॥32॥ |

| |
|---|
| ददौ तेजोमयं तारमयं तारकजित्प्रियः।<br>वज्रं चारमयन्तारमयन्तारममुं सुराः॥33॥ |
| चयाः हेममया नानामयानानायकाः सताम्।<br>बभुः द्युधामयानानामयाना नाभवंश्च ये॥34॥ |
| तरसा वाजिनः प्राप्तरसावाजित्वमाययुः।<br>विरसा वाजितो जेता रसा वाजितभृत्तु यान्॥35॥ |
| रणवाद्यकृतावतारया ध्वनितत्याऽणु बभूव तारया।<br>द्युबिलं परमं बताऽऽर या हरिणाप्ताः स्वरथावता रयाः॥36॥ |
| करिणां गुरुबृंहितानि वात्युरुचक्रे प्रतिसंहितानि वा।<br>इह तान् मदमोहितानिवाभ्यधुरेषां समरेहितानि वा॥37॥ |
| चलताचलता लतालतामणिदाम्ना स रुचापि केतुना।<br>वसनावसिना सना सनानिल वृत्त्याचलपत्रविभ्रमः॥38॥ |
| गदयाऽगदयाऽदयादया शरचापैरसिभिश्च राजिता।<br>लसता लसता सताऽसतामहितेनैर्यत वज्रिणा चमूः॥39॥ |
| हरितो हरितोरितोरितो बलवेगो भुजयोर्निरस्यताम्।<br>सहसासहसाहसाहसादितिदेवेशचमूर्मिथः पुरा॥40॥ |
| तरुणा तरुणारुणारुणा ग्रगभासा हृतचेतसस्तदा।<br>हरिणा हरिणारिणाऽरिणा लसताऽऽप्ता विबुधाः शिवा इव॥41॥ |

सुरावतः शुभधरतस्त्व रावतः सुरा वत स्वकुलपुरस्सारवतः।
जयायतेनपयमगुर्नयायते प्रियायते स्म हृदि हरेर्दयाऽयते॥42॥

सुराः नयं समधित याञ्च्छरान् अयं सुरान् अयन् इह विदुःआसुरा न यं।
निरास नन्वमरधृतिं शरासनं परासनं यदुपमाकरासनम्॥43॥

मरुद्वषः प्रदरसमाजवारिताः रिपौ भियः पदरसमाजयोधिनः।
सुनादिनस्सुदरसमा जवाद्वले सुरास्तदा मदरसमाजये दधुः॥44॥

ततोऽतनोत्समरमयं नवाभ्रभा बलवद्विरोध्यमरमयन् अजैत्रताम्।
खगो जनैः समरमयत् नदन् अमुं जनोऽपरः ते अरं अयन् न तस्थिवान्॥45॥

सुरास्त्रतो निरगुरवारणेऽरणे रथाग्निवज्जनभयकारणे रणे।
शराः परस्सति तनुदारणे रणेदिति स्फुटं कृत पृथुवारणेरणे॥46॥

दिशां पतीनथ तनुलोपरापराजितान्व्यधात् प्रदरपरम्परापरा।
हरे रणादपनयतत्पराऽपराध्यसुहृदोऽजनि हतरुक्पराऽपरा॥47॥

सम्भावितानामनिशं रणे तदा विद्रावितानामनिरूप्य शोच्यताम्।
महावितानामनियम्य च क्रुधं स्वर्गाविता नाम तदाप तं हरिः॥48॥

शरैस्स दामोदरमानवैरतस्युदारवर्णं गुरुमानवैरतः।
मुक्तो रुरोधैनममानवैरतः सतां स्थितौ यन्महिमा न वै रतः॥49॥

प्रसार्य माणप्रदरादरातितो बलस्य निर्धूतदरादराजत।
अजोऽधिकं सायकधारयारया दाच्छाद्य तं मर्मसु धारयाऽऽर या॥50॥

शरेण घोरेण करेण शक्रो वरेण वीरेण हतः परेण।
वज्रेण सारेण खरेणतं स्मोद्धारेण सूरेण करेण हन्ति॥51॥

मितेन भूतेन हितेन लीलयाऽऽहितेन तत्तेन इतेनतेत्रवै।
हस्तेन वृत्तेन ततेन तेजसा स्थितेन शक्तेन धृतेन पुष्पवत्॥52॥

हराजराजाराजकं पुराजगत्करोति यः।
द्युराजराजराजकं रराजकेशवो जयी॥53॥

श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्य विरचितायां पारिजातापहरणकाव्यराजं प्रथम आश्वासः समाप्तः॥1॥

## तृतीय आश्वास -3- (71)

अथ सुत्रामा नयतः तरुवर्यं स्वेन तेजसाऽमानयतः।
विस्मयमतिमानयतः प्रेक्ष्य ययौ कर्मतस्य बहुमानयतः॥1॥

मघवा गतमानतया नतया नतया नतयास्थितिमाप हरेः।
प्रिययाऽऽवृतभावमतो वमतो वमतो वमतोपगमद्गुरुताम्॥

पुरनेत्यस, मोहरतो हरतो हरतो हरतोऽस्यविभोः स्वतरुम्।
विशदस्तवनायततोऽयततो यततो यततोरुहृदो लसितः॥3॥

भवतोऽभवतो भवतो भवतो जगतो विलयः प्रभवोऽप्यजतः।
महिता महितामहितामहितार्थिद, यति भवत्कृपया फणिराट्॥4॥

| |
|---|
| सुरसासुरसासरसासुरसा ध्ववनक्षयदोऽसि भुवं हिगतः।<br>बलतो बलतो बलतो बलतो न भयं मम चास भवद्दयया॥5॥ |
| सहते सहते सहते सहते स्पृधमीशकरोरिचये स्वकुलैः।<br>नयतोनयतोनयतोनयतो हृदयं व्यसनान्यपयान्ति सदा॥6॥ |
| गतशोकमलाकमलाक्षसुतं जननी कमला कमलालयत।<br>इयमेव पुरावपुरापपुनः तव देवपुरावपुरानुगुणम्॥7॥ |
| नमानवावानमान मानमाननमाऽनमा।<br>नमायतातायमान वानताननतानवा॥8॥ |
| कृष्णानामयरिष्टनामसुखसन्दोहस्यवाणीशते।<br>सुश्रीराबहुजातिनामसुमतां सारश्रयेयं पदम्।<br>वह्नाय प्रततस्वनामसुधयाऽक्षीणं प्रजापानिशं |
| शङ्खिन् सत्कुतभासुरोरुबलधीतेद्धासदन्तैर्भृशम्॥9॥ |
| धामानि मानितवहन् असमानि मानिभीमानि माऽनिशमवेद्दविमानि मानि।<br>वामानि मानि मदघं विदमानि माऽनिस्थेमानि मानिलय सत्वममानिमानि॥ |
| समानतायमानया समानतायामानया।<br>समानतायामानया,समानतायामानया॥11॥ |
| नयावलानयावलानयावलानयावला।<br>नयावलानयावलानयावलानयावला॥12॥ |

त्वयाहिमारणेरणेरणेरणेजगत्त्रये।

कृतेमहाबलेबलेबलेबलेखनः पुनः ॥13॥

लोकात्परम्परम्ब्रह्मत्वंसद्गुणपरम्परम्।

कलङ्कलन्धियद्गीत वेदैः प्रसकलङ्कलम्॥14॥

महतोदेवयंन्तासिमहतोदेवतेरकः।

महतोदेहिवद्धित्वमहतोऽदशुशोकदः॥15॥

ततोऽततोऽतीततातताततात तत्तत्ततेतितुत्।

तत्तत्तोत्तोत तु ततोऽतीतैतत्तातततोत ते॥16॥

भुवनानि समं सृष्ट्यस्तवनानि सदीक्षणात्।

भवनानि सतां यान्ति सवनानि सदा तव॥17॥

त्वं माकरेण वपुषाऽसुकरेण पूर्वं वेदाकरेण सुगुणप्रकरेण लीलाम्।

श्रेयस्करेण परिसारिकरेण लज्जादायिन् करेण विपुलेन करेणवेऽगाः॥18॥

कूर्माय तेऽथ परमाय नमोऽसमाय

वामाय साद्रिधृतिमायतयाऽऽश्रमाय।

त्वामाययुर्ननु शमाय जना दमाय

भीमाय चाप्य नियमाय धृतिं यमाय॥19॥

| |
|---|
| लक्ष्मीवरातनुवराहरावरारि<br>भित्तत्पराखिलपराप्तपरापराध।<br>भृत्योदयार्थहृदयातिदयार्द्रया प्राक्<br>पृथ्व्याऽऽर्तयामुदितयाश्रितयातयाधः ॥ 20 ॥ |
| मन्त्रे परेण नखरेण खरेण पूर्वं सिंहात्मना सुरवेण वरेण लक्ष्म्याः।<br>वैरे,खरेण मुखरेण खरेण वेश द्वेष्ट्रोद्ददाद्रिशिखरेण खरेण देव ॥ 21 ॥ |
| त्वं वामनीकृतमहाबलितोऽथलोकान्<br>प्राप्तक्रतूत्तममहाबलितोऽपि भक्तात्।<br>आच्छिद्य दैत्यशमहा बलितो हि मेऽदाः<br>पूर्वं महेश्वर महाबलितो दयालो ॥ 22 ॥ |
| राजन्यतोदमवलोक्य भुवोऽमरेन्द्रैः<br>राजन्यतो भुवि भवान् अभियाचितोऽजः।<br>राजन्यतोऽतिबहुशाः नृपनन्दनाभी<br>राः जन्यतो विनिहता भवता द्विजेन ॥ 23 ॥ |
| श्रीरामया तव वनेसहसानुजस्य<br>श्रीराम यानमथ राक्षससूदनं च।<br>स्वाराम याचितवतां हि मुदे सुराणां<br>सारा मया न सुगमा हि गुणास्तवेश ॥ 24 ॥ |

| |
|---|
| श्रीवासुदेव सततादिरवासु देव त्वद्विक्रमक्रमचणा विविधावतार।<br>सेवासुदेवनसुधाऽभिनवाऽसुदेव श्रीकान्त सम्प्रतमहो यदुवंशकेतो॥25 |
| सुखंत्वदारसारसारसारसायनाशनैः<br>धृतोपहारसारसारसारसातलालयैः॥26॥ |
| नमोऽस्तु सुन्दरायते मुदन्तनूदरायते।<br>प्रियस्तवादरायते पदे पुरन्दरायते॥27॥ |
| नवनवनवचोमुष्येत्थमाकर्ण्यलोका-<br>नवनवनवकृत्त्वं पञ्चचेत्थेनमुत्त्वा।<br>नवनवनवरार्थगेन्द्रवात्रैष दैत्य-<br>नवनवलभृदीशो द्वारकां गन्तुमैच्छत्॥28॥ |
| स कनकसारागस्य श्रियः पतिः स्वाङ्गतेजसाऽरागस्य।<br>उपरि ससाराऽऽगस्य स्थितया देव्या गुरुप्रसारागस्य॥29॥ |
| तं तेन निशामयता प्रवराप्रोचेऽथ सुदृशामयता।<br>येन त्वकृशामयता चक्रेऽरीणां बले विसदृशामयता॥30॥ |
| तन्वि सुरागोऽत्रस्तश्रीमणि किरणैरयं सुरागोऽत्रस्तः।<br>नास्ति सुराः गोत्रस्तस्यास्य समः सुखी दुर्भगोजरागोत्रस्तः॥31॥ |
| निकटकटकवान्विकटकटकिनि प्रकटकटगजैःसकटकटरवः।<br>अयमयमयमः श्रयति नियमतो नयमयमयमः स्वयमयमभयः॥32 |

| |
|---|
| घनाळी नाळीकप्रसररुचिरा चात्र सुरसां<br>सुनाळी नाळीडो यदुदरपुटः कच्छपचयैः।<br>वनाळीनाळीनावितरति रतीच्छां तु विरुतिः<br>न नारीऽऽनाळीनांमनुनयमृते नैति रमणम्॥ 33॥ |
| मनोरमतयातया लसितयातयासंयुते<br>हरेः स्वभवने वने सजवनेवनेयङ्गतिः।<br>जयोद्यतिधराधरा अपिधराधराधीश्वरे<br>वसन्ति मुनयोनयोर्विनयोनयोप्युज्वलाः॥ 34॥ |
| पुन्नागानामाळीताळीसन्नागानामाळीनेह।<br>नानागानामावळ्यासम्पन्नागानामत्वं पश्य॥ 35॥ |
| हिन्तालानामत्र घ्नन्ति श्रेणीं वातालानामग्र्याम्।<br>उत्तालानामप्युद्धस्ता त्यक्तालानाः मत्तेभेन्द्राः॥ 36॥ |
| अस्मिन् वनिताभिः भूमावनिताभिः साग्र्यावनिताभिः श्रृङ्गं वनि ताभिः।<br>देवाश्चरमन्ते प्राप्याचरमन्ते क्वाप्युच्चरमन्ते दृग्गोचरमन्ते॥ 37॥ |
| शिखारिवसत्या सत्या सत्या सत्यादरे न याऽस्य गिरम्।<br>प्रचकासत्याऽसत्या सत्या सत्यागया नुतेत्यश्रुणेत्॥ 38॥ |
| समधित नागानागनागानागामिनो जवैर्विदधत्।<br>दिविनानागनागानागानागात्रताकृतंश्रृण्वन्॥ 39॥ |

| |
|---|
| कल्लोलमालाभिरिवाभियातुमुल्लोलमालालकमब्धिमैक्षत।<br>फुल्लोलमालाप इवाच्छफेनैः उल्लोल आलापि मुखं बभार यः॥40॥ |
| श्रियानृपाद्यायजयीह भूम्ने स्फुरत्कुपाद्यायजगद्विधात्रे।<br>यः सार्ध्यपाद्यायजलानि वीच्यारत्नैः प्रपाद्यायजदध्रिपारश्वैः॥41॥ |
| द्वारकान्तामिहोद्धाजब्दारकान्तामवैक्षत।<br>द्वारकान्ताममलसद्वारकान्तामवाप च॥42॥ |
| ययावुपपुरं मन्दपवनानि वनानि च।<br>सरस्सु यत्र साब्जानि पावनानि वनानि च॥43॥ |
| क्षणेन सर्वर्तवः सुवीक्षणेन सुवीक्षिताः।<br>क्षणेन सर्वसूनौघलक्षणेन सता दृशाम्॥44॥ |
| माधवेन गुणेन प्राङ्माधवेन विये सुखम्।<br>माधवेन ततः प्रीतो माधवेन त्वमेयिवान्॥45॥ |
| नलिनीस्पुगल्पपवमानयता श्रमिता नृणां स्वमिव मानयता।<br>ऋतुना प्रसूनभरमानयता मुदितं जनेन दममानतया॥46॥ |
| दलितानवाम्रममुनोपवनं समसेव्यतोत्कदली तानवमुक्।<br>दलितानतं नवपलाशवनं स ददर्श कूजदलितानमपि॥47॥ |
| समयो महाशुचितया व्यलसत् नवमल्लिकाशुचितयासवनम्।<br>सुशिरीषकांशुचितया स्म ययौ विरही तदाऽशुचितया घटनाम्॥48॥ |

| |
|---|
| तदुरुक्रमेण सशरच्छिशिरैः ऋतुभिः क्रमेण समवेतगुणम्।<br>वनचक्रमेण समलोचनया गुरुविक्रमेण सहजुष्टमभूत्॥ 49॥ |
| रमते जनः स्म मदनेन मनो यदतस्तु अदान्तिमत् अनेन कृतम्।<br>क्रमुकस्य मोदमदनेन गतो न परं प्रियाऽनमत् अनेनसि च॥ 50॥ |
| सदृशाः स्त्रियो नवघनेन ततो वनगोस्तले सुजघनेन तताः।<br>कुचमण्डलेन च घनेन तटित्वसनेन सुन्दरघनेन वराः॥ 51॥ |
| वनिताभिरामयमुचो यदवो गुणिताभिरामतनुभिर्व्यहरन्।<br>ललिताभिरामहितभूषणकैः कुदिताभिराममपिराजसुता॥ 52॥ |
| नामानिनामानिशमामनंस्ते नामानिनामानितरां हृदास्ते।<br>मानेनमानेनसमस्मरस्त्वं मानेनमानेन कुरुष्वमुक्तम्॥ 53॥ |
| मा याहि मायाहित इत्युपेक्षामायाः हिमायाः हि जनान् क्षमाब्धिः।<br>मही महीयात्खलु माधवोऽपि महीमहीनां क्षमया विभर्ति॥ 54॥ |
| कान्ताऽऽर कान्तारतिंमाशु जुष्टकान्तारकान्ता रपितेति दूत्या।<br>मान्याऽनमाऽन्या न ययौ पतिं स मान्यानमान्याऽऽनयतेऽत्र चक्रे॥ 55॥ |
| इति नानालीलाभिः जहसे श्रीः श्रितसरोबनालीलाभिः।<br>ताभिर्नालीलाभिस्वनृभिः सममानवैर्ननालीलाभिः॥ 56॥ |
| सत्या सरसा रङ्गन् अजो मुदा सजलजालि सः रसारङ्गम्।<br>सपुरःसरसारङ्गं धृतं जलं गच्छति स्म सरसाऽरं गः॥ 57॥ |

सह रमया प्रहरमयात् विहृतिमथ द्वारकां पुरीमविशत्।
विहर मयाऽघहर मया सममिति वाद्यस्वनैरिवात्तगिरम्॥ 58 ॥

चक्रेण वत विकासः सहाब्जचक्रेण वर्जितो यत्सूर्यः।
चक्रेण वरेण समोऽस्तगतिं चक्रेऽणवः च दृग्भासोऽथ॥ 59 ॥

तमसारब्धातिबृहत् तमसारवकद्विजं प्रदोषमहो।
तमसारमवेक्ष्य किलोत्तमसारसलोचनाः भियेष्टमगुः॥ 60 ॥

स्ववताराणामक्ष्णां हततारणामलञ्जनस्यगुणैः।
ताराणामथमध्येताराणाममृतगुर्ययाबुद्यम्॥ 61 ॥

मानानामबलानामसमानानामभूत्क्षयोऽयंन।
मानानामधुरगुरैल्लसमानानामनर्मसाचिव्यम्॥ 62 ॥

अधिकसुराः रसमाना परस्परं रागभासुराऽऽर समाना।
पीतसुरारसमिष्टप्रियावलिः तुलितसत्सुरा रसमत्र॥ 63 ॥

तल्पानां महितान्ते स्वाकल्पानां महिष्ठभासां मध्ये।
स्वल्पानां महिलानां रतिकल्पानां महित्वचारुगृहाणाम्॥ 64 ॥

रतमुरुमङ्गलताभिः तरुणाः चक्रुः सरागमङ्गलताभिः।
परमङ्गलतारहिताकामङ्गलतारमौतिकाद्येन॥ 65 ॥

मागधराजजितोऽभूत् परमागधराग्र्यभर्तुरुषसिमुदे।
मागधरावः श्राव्यो विषमागधराभृतः सवाध्यरवः॥ 66 ॥

सत्सारसारधुविकासविसारसारशीकृत्तमःक्षपणदक्षतमोऽतिदीप्तः।
भासा रसारतिनुदा विससार सारश्रीचक्रवान् हरिरथोदयमस्तसारः॥67॥

राजन्तं सन्मुहूर्तें बरवरदवचःकल्पितेशं नगाली
राजन्तन्बानमिष्टप्रभवरवरणवद्वाद्यमाप्तं विजित्य।
राजन्तं देवतानामलमलघुमिहास्थापयच्छ्रीजितो द्य-
द्राजन्तन्व्याः पुरान्ते विमलमळसताम्मुक् मुकुन्दः प्रियायाः॥68॥

मदेन सार्धं सुरभर्तुरित्थं जहेमुनासप्रमदेन सालः।
मदेनसामस्तु भिदेति लोकैः सङ्गीयते हि प्रमदेन साकम्॥69॥

नवमंनवमन्युभुजं महतां नवमंनवमन्त्रगणोक्तगुणम्।
परमंपरमंशमजस्यगतोपरमं परमंन्वभजन्सुजनाः॥70॥

निजे पुरे सनन्दकः सुनन्दनन्दनन्दकः।
तरुश्रियास्तनन्दनो  ननन्दनन्दनन्दनः॥71॥

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुत श्रीमन्नारायणपण्डिताचार्यविरचितस्य काव्यराजस्य पारिजातापहरणे ततीयाश्वासस्समाप्तः॥3॥

॥समाप्तोयं ग्रन्थः॥

॥श्रीकृष्णार्पणमस्तु ॥